दिनाङ्क:-11.01.2026 प्रात: - 06:55

## अथ वार्ताः

### प्रधानमन्त्री-गुजरातयात्रा

प्रधानमन्त्री नरेन्द्र-मोदी अद्य गुजरातस्य प्रभास-पाटनस्थिते सोमनाथमन्दिरे शौर्य-यात्रायाम् उपस्थास्यति। इयं शौर्ययात्रा तेभ्यः कृतज्ञतां ज्ञापयति यैः सोमनाथमन्दिरस्य रक्षार्थं स्वकीयं सर्वस्वं समर्पितम्। कार्यक्रमस्य अनन्तरं प्रधानमन्त्री नरेन्द्र-मोदी सोमनाथमन्दिरे पूजां विधाय एकां जनसभां सम्बोधयिष्यति। श्रीमोदी अद्य राजकोटम् उपेत्य द्विदिवसीय-जीवन्त-गुजरात-क्षेत्रीय-सम्मेलनस्य उद्घाटनं करिष्यति। आत्रावसरे गुजरातस्य मुख्यमन्त्री भूपेन्द्र-पटेलः उपमुख्यमन्त्री हर्ष साङ्घवी च उपस्थितौ भविष्यतः।

---------------------------------------------

### अमितशाहः त्रिवेन्द्रमयात्रा

केन्द्रीय-गृह-सहकारिता-मन्त्री अमितशाहः अद्य केरलस्य राजधान्यां तिरुअनन्तपुर-नगर्यां सम्प्राप्तः। विमानपत्तने नवनिर्वाचितः सदस्यः वि. वि. राजेशः केरलस्य भाजपादलाध्यक्षः राजीव-चन्द्रशेखरः अन्ये च वरिष्ठ-भाजपानेतारः गृहमन्त्रिणः स्वागतम् अकुर्वन्। यात्रावधौ गृहमन्त्री श्रीपद्मनाभ-स्वामि-मन्दिरे पूजार्चनां करिष्यति। मध्याह्ने गृहमन्त्री स्थानीय-निकायनिर्वाचनेषु चयनितेभ्यः भाजपा प्रत्याशिभिः सह मेलनं करिष्यति। गृहमन्त्री अमितशाहः केरल कौमुदी कार्यक्रमे अपि उपस्थास्यति।

---------------------------------------------

### अमितशाहः राजस्थान-नियुक्तयः

गृहमन्त्रिणा अमितशाहेन उक्तं यत् कस्यापि राज्यस्य विकासे विधिव्यवस्थायाः महत्त्वपूर्णा भूमिका भवति। तेनोक्तं यत् भद्रतर-विधि-व्यवस्था युतानि राज्यानि निवेशकान् आकर्षयन्ति। गतदिने जयपुर-नगरे आरक्षि-सहायकानाम् नियुक्ति-समारोहे गृहमन्त्री अवोचत् यत् सत्यपि बहूनि समाह्वानानि राजस्थान-प्रशासनेन विधि व्यवस्थायां विशेषावधानं प्रदत्तम्।

-----------------------------------------------

## प्रवर्तन-निदेशालयः

प्रवर्तन-निदेशालयेन गतदिने आई-पी.ए.सी इति प्रकरणे सर्वोच्च-न्यायालयम् उपेत्य शीघ्रतया कार्याचरणस्य अनुरोधः कृतः। अत्रान्तरे पश्चिम-बङ्गाल-प्रशासनेन सर्वोच्च-न्यायालये प्रतिभूतिं प्रस्तूय उक्तं यत् तदीयं पक्षं विना प्रकरणेस्मिन् आदेशम् न यच्छेत् इति। अवधेयं यत् इतः प्राक् गुरुवासरे प्रवर्तन-निदेशालयेन पश्चिम- बङ्गालस्य मुख्य-मन्त्रिणं ममता बनर्जिनं विरुध्य कोलकाता उच्च-न्यायालये केन्द्रीया-वीक्षणाभिकरणद्वारा अन्वीक्षणस्य याचना प्रस्तुता आसीत्। न्यायालेन च अस्य मासस्य चतुर्दश दिनांक यावत् वादश्रवणं निराकृतम्।

-----------------------------------------------

## वित्तमन्त्री-आयव्यय सत्रम्

केन्द्रीय वित्तमन्त्री निर्मला सीतारमनः गतदिने नवदिल्याम् एषमः वित्त-सङ्कल्पना-सत्रात् पूर्वं चर्चायै राज्यैः केन्द्रशासित-प्रदेशैः च साकम् उपवेशनं कृतवती। अस्मिन् उपवेशने नैकेषां राज्यानां केन्द्रशासित-प्रदेशानां च मुख्यमन्त्रिणः वित्तमन्त्रिणः च उपस्थिताः आसन्। उपवेशनस्य अनन्तरं वित्तमन्त्रालयेन उक्तं यत् प्रतिभागीभिः वित्त-सङ्कल्प-पत्रस्य विषये सम्मर्शाः प्रदत्ताः। अवधेयं यत् वित्तसङ्कल्पना सत्रम् अस्य मासस्य अष्टविंशतिः दिनाङ्के आरपस्यते।

-----------------------------------------------

## विकसितभारत-युव-नेतृ-संवादः

क्रीडा युव-प्रकरणानां मन्त्री डॉ. मनसुख मांडविया अवदत् यत् ऐषमो विकसितभारत-युव-नेतृ-संवाद-कार्यक्रमः विशेषो वर्तते। अयं कार्यक्रमः युवभ्यः देशस्य विकासाय तेषाम् अभिमतं प्रस्तोतुम् अवसरं प्रदास्यति। कार्यक्रमः यूनः अग्रे आगत्य नेतृत्वं कर्तुम् समाह्वानानि सम्मुखीकर्तुं देशस्य भविष्य-निर्माण-रूपरेखां निर्मातुं च योगदानाय सशक्तं करिष्यति। तेनोक्तं यत् अस्मिन् कार्यक्रमे सम्पूर्ण-देशस्य युव-नेतारः प्रधानमन्त्रिणा नरेन्द्र-मोदिना सह विकसित-भारतस्य दृष्टिकोणे विचार-विमर्शं करिष्यन्ति। चतुर्दिवसीयः अयं कार्यक्रमः सोमवासरे जनवरी द्वादश्यां

पूर्णो भविष्यति। अस्मिन् कार्यक्रमे देश-विदेशेभ्यः सार्धद्विसहस्र-युवानः सम्मिलिताः । क्रीडा युव-प्रकरणानां मन्त्री डॉ. मनसुख मांडविया अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी सोमवारे नव-दिल्ल्यां विकसितभारत-युव-नेतृ-संवाद-कार्यक्रमस्य समापन-सत्रे उपस्थास्यति। प्रधानमन्त्रिणा अस्मिन् कार्यक्रमे देशस्य युवभिः सह संवादाय उत्सुकता प्रकटिता। तेनोक्तं यत् देशस्य युवशक्तिः असाधारणद्वितीयोत्साहेन सह राष्ट्रस्य विकासाय प्रगतये च प्रतिबद्धा अस्ति।

---------------------------------------------

## क्रिकेट्

भारतन्यूजीलैण्डदलयोः तिसृणाम् एकदिवसीय-क्रिकेट-स्पर्धा-मालिका अद्य आरभते। शृङ्खलायाः प्रथमा स्पर्धा अद्य गुजरातस्य वडोदरा नगरे क्रीडिष्यते। भारतीयसमयानुसारेण इयं स्पर्धा मध्याह्ने सार्धैकवादने आरब्धा भविष्यति।

**।।इति वार्ता:।।**